# 2022

## M.A.

## 4th Semester Examination

## SANSKRIT

## PAPER—SAN-403

*Full Marks* : 40

*Time* : 2 Hours

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

सर्वे प्रश्नाः संस्कृतेनैव समाधेयाः। (देवनागर्या)

### SAN-403A (POETRY-II)

### Group – A

**1.** प्रश्नद्वयं समाधेयम् – 2×2

(a) विदुषां मते बाणभट्टस्य प्रथमा कृतिः का अस्ति? तस्य पितुः किं नाम?

(Turn Over)

(b) 'हर्षचरितम्' इति गद्यकाव्ये कति उच्छ्वासाः विद्यन्ते? हर्षवर्धनस्य पिता कः?

(c) कुरङ्गकः कः?

**2.** द्वयोः व्याख्या कार्या — 2×4

(a) नियतिर्विधाय पुंसा प्रथमं सुखमुपरि दारूणं दुःखम्

कृत्वालोकं तरला तडिदिव वज्र निपातयति।

(b) मातापितृसहस्राणि पुत्रदारशतानि च।

युगे युगे व्यतीतानि कस्य ते कस्य वा भवान्।।

(c) लोके हि लोहेभ्यः कठिनतराः खलु स्नेहमयाः

बन्धनपाशाः यदाकृष्टाः तिर्यकञ्चोऽपि एवमाचरन्ति।

**3.** एकः प्रश्नः समाधेयः — 1×8

(a) 'बाणोच्छिष्टं जगत्सर्वम्' — इत्युक्तेः याथार्थ्यं प्रतिपाद्यताम्।

(b) बाणभट्टमनुसृत्य धवलगृहवर्णनं क्रियताम्।

## Group – B

**4.** प्रश्नद्वयं समाधेयम् — 2×2

(a) 'बुद्धचरितम्' — इति महाकाव्यस्य प्रणेता कः? तस्य कृतीनां परिचयो दीयताम्।

(b) बुद्धचरिते तृतीयसर्गे प्रधानं छन्दः किमस्ति? तल्लक्षणं किम्?

(c) 'विषक्तमाल्यम्' — इति शब्दस्य कोऽर्थः?

**5.** द्वयोर्व्याख्या कार्या — 2×4

(a) निवर्तयामास च राजमार्गे

संपातमार्तस्य पृथग्जनस्य।

प्रागुक्तकुमारः सुकुमारचित्तः

संविग्नचेता इति मन्यमानः॥

(b) अथो नरेन्द्रः सुतमागताश्रुः

शिरस्युपाघ्राय चिरं निरीक्ष्य।

गच्छेति आज्ञापयति स्म वाचा

स्नेहान्न चैनं मनसा मुमोच॥

(c) ततः स पूर्वाशयशुद्धबुद्धि –

र्विस्तीर्णकल्पाचितपुण्यकर्मा।

श्रुत्वा जरां संविविजे महात्मा

महाशनेघोषमिवान्तिके गौः॥

**6.** एकः प्रश्नः समाधेयः – 1×8

(a) बुद्धचरितमहाकाव्यस्य तृतीयसर्गमवलम्ब्य महाकवेरश्वघोषस्य रचनाशैली विचार्यताम्।

(b) बुद्धचरितस्य तृतीयसर्गमनुसृत्य सिद्धार्थस्य विहारयात्राकाले देवैः प्रेरितानां जराव्याधिपीडितानां मनुष्याणां वर्णनं क्रियताम्।

---

## SAN-403B (NYAYAVAISESIKADARSANA)

### Group – A

1. प्रश्नद्वयं समाधेयम् – 2×2

(a) न्यायमते कति पदार्थाः? के च ते?

(b) न्यायमते कति प्रमाणानि? कानि च तानि? तत्र प्रत्यक्षप्रमाणलक्षणं किम्?

(c) न्यायमते कति प्रमेयाणि? कानि च तानि?

**2.** द्वयोः व्याख्या कार्या — 2×4

(a) 'प्रमाणतोऽर्थप्रतिपत्तौ प्रवृत्तिसामर्थ्यादर्थवत् प्रमाणम्' — व्याख्यायाताम्।

(b) 'तत्र वादजल्पौ सप्रयोजनौ वितण्डा तु परीक्ष्यते' — भाष्यवचनमेतत् व्याख्यायताम्।

(c) 'तदत्यन्तविमोक्षोऽपवर्गः' — सूत्रमिदं व्याख्याताम्।

**3.** एकः प्रश्नः समाधेयः — 1×8

(a) संशयादीनां पदार्थाना याथासम्भवं प्रमाणेषु प्रमेयेषु चान्तर्भवन्तोऽपि तेषां पृथगुल्लेखे कारणं किम्? उपस्थाप्यताम्।

(b) न्यायसूत्राणाम् आद्यानि दशसूत्राणि विलिख्य सरलसुरगिरा क्रमेण तेषामर्थः स्पष्टीक्रियताम्।

## Group – B

**4.** प्रश्नद्वयं समाधेयम् – 2×2

(a) न्यायकन्दली केन विरचिता? अत्र टीकायां भाष्यलक्षणंम् उपपद्यते न वा?

(b) प्रशस्तपादमते कति पदार्थाः? के च ते?

(c) प्रशस्तपादमते निः श्रेयसलाभे हेतुः कः?

**5.** यथेच्छं द्वयोः टीका लेख्या – 2×4

(a) कणादः

(b) पदार्थधर्मसंग्रहः

(c) पृथिव्यादीनां साधर्म्यम्।

**6.** एकः प्रश्नः समाधेयः — 1×8

(a) कन्दलीकारमनुसृत्य प्रशस्तपादभाष्यगतं मङ्गलाचरणं व्याख्याय तस्य फलं निर्धार्यताम्।

(b) प्रतिपक्षमतान् खण्डयित्वा न्यायकन्दलीकृदनुसारं महोदयस्वरूपं निरूप्यताम्।

———